दिनाङ्क :- 02.07.2024
प्रातः - 06: 55

**धन्यवादप्रस्तावः**

संसदः उभयोः सदनयोः राष्ट्रपतेः द्रौपदीमुर्मूवर्यायाः अभिभाषणानन्तरं धन्यवादप्रस्तावे चर्चा अभवत्। भारतीयजनता पार्टीतिदलस्य सांसदः अनुरागसिंहठाकुरः चर्चायां प्रातिभाग्यं कुर्वन् गतदशर्षेषु प्रशासनद्वारा विभिन्न क्षेत्रेषु कृतोपक्रमाणां प्रशंसाम् अकरोत्। तेनोक्तं यत् अर्थव्यवस्थायां वृद्धिः, जनकल्याणकार्याणि च प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे प्रशासनद्वारा समुत्थापित-पदक्षेपस्य परिणामः वर्तते। इतः पूर्वं विपक्षीयनेत्रा राहुलगांधिना नीट-परीक्षायां कथितरूपेण सञ्जात-अनियमिततानां प्रसङ्गोऽपि समुत्थापितः। तेनोक्तं यत् राष्ट्रस्य संसदा विद्यार्थिभ्यः एकः सन्देशः गच्छेन् यत्र नीटेति विषयः संसदेऽपि महत्वपूर्णः अस्तीति। श्री राहुलगांधी स्वकीये वक्तव्ये अग्निवीर-मणिपुरादि विषयानपि उत्थापितवान्। उभाभ्यां सदनाभ्यां भारतीयक्रिकेटदलद्वारा विंशतिं प्रति विंशतिः पुरुषविश्वचषकस्पर्धाजये भारतीयदलाय वर्धापनानि प्रदत्तानि।

**अमितशाहः आपराधिकाविधयः**

त्रयोविंशत्यधिकद्विसहस्रतमवर्षस्य त्रयः नूतन-आपराधिक-विधयः भारतीय-न्याय-संहिता,भारतीय-नागरिक-सुरक्षा-संहिता,भारतीयनागरिक-सुरक्षाधिनियमश्च ह्यः आरभ्य प्रवर्तन्ते। केन्द्रीयगृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् त्रयोऽपि आपराधिकविधयः राष्ट्रे सर्वातिनूतनतमां आपराधिकन्यायप्रणालीं समारप्स्यन्ति। तेनोक्तं यत् आपराधिकन्यायप्रणाली सम्प्रति पूर्णतया स्वदेशीया वर्तते, स्वातन्त्र्यानन्तरञ्च भारतीयलोकाचारे अन्तर्निहिता वर्तते। विधित्रयस्य विषये भाषमाणः गृहमन्त्री नवदिल्ल्यां वार्ताहरान् अवोचत् यत् नूतनविधयः त्वरितन्यायेन सह पीडितानाम् अधिकारान् निश्चयिस्यन्ति। गृहमन्त्रिणा प्रोक्तं यत् प्रशासनेन नूतन प्रावधानैस्सह राजद्रोहविधिः समापितोऽस्ति। महिलाः शिशवश्च प्राथमिकतायां सन्ति, एतदर्थं पञ्चत्रिंशद्-उपभागैस्सह त्रयोदशप्रावधानयुतः एकः विशिष्टाध्यायः संयोजितोऽस्ति।

श्रीशाहेनोक्तं यत् सामूहिक-दुराचाराय जघन्यापराधत्वात् विंशतिवर्षाणां कारावासः उत वा आजीवनकारावासस्य दण्डः सुनिर्धारितोऽस्ति, अवयस्कैस्सह कृतदुराचाराय मृत्युदण्डः सुनिश्चितोऽस्ति। श्रीशाहेनोक्तं यत् पीडितायाः वक्तव्यं तस्याः एव गृहे स्वजनैस्सह संस्थाप्यैव अधिकारिभिः गृहीष्यते। विधिषु आन्तर्जालिकमाध्यमैरपि प्राथमिक्याङ्कनस्य व्यवस्था वर्तते। श्रीशाहेन विधिविषयेषु दुष्प्रचाराय विपक्षिणोऽपि गर्हिताः। तेनोक्तं यत् विषयेऽस्मिन् नवहोराधिकं लोकसभायां षड्होराधिकञ्च राज्यसभायां चर्चा अस्ति सञ्जाता।

## भारत-पाकिस्तान

भारत-पाकिस्तान-देशयोः मध्ये ह्यः नवदिल्ली-इस्लामाबाद-नगरयोः कूटनीतिक-माध्यमेन परस्परं निग्रहे स्थितानां नागरिक-मत्स्यजीविनां नामानि प्रदत्तानि | विदेशमन्त्रालयेन उक्तं यत्, भारतेन स्वीय निग्रहे षड्षष्ठ्याधिक त्रिशतं नागरिकाणां, कारावासे षडासीति मत्स्यजीविनां च नामानि प्रदत्तानि, ये पाकिस्तानीति मन्यन्ते। पाकिस्तानदेशः स्वीय निग्रहे त्रि चत्वारिंशत् नागरिकाणां, कारावासे एकादशोत्तर द्विशतं यावत् मत्स्यजीविनां च नामानि प्रदत्तवान्, ये भारतीय नागरिकाः सन्तीति मन्यन्ते। एतादृशीनां सूचीनां आदानप्रदानं प्रतिवर्षं जनवरी-मासस्य प्रथमे दिने, जुलाई-मासस्य प्रथमे दिने च भवति।

## महिलाक्रिकेट

महिला क्रिकेट निकषस्पर्धायां चेन्नई नगरस्य एम.ए. चिदम्बरम् क्रीडाङ्गणे भारतदक्षिण-अफ्रीका देशयोः दलयोर्मध्ये स्पर्धा अभवत्। क्रीडायाः चतुर्थे दिवसे दक्षिण-अफ्रीकादेशीयेन दलेन समेषां क्रीडकानां हानौ त्रिसप्तत्यधिकत्रिशतम् धावनाङ्कान् विरच्य सप्तत्रिंशत् धावनाङ्कानां लक्ष्यं प्रदत्तम्। भारतीयदलेन च एकस्यापि क्रीडकस्य हानिं विनैव लक्ष्यं सम्प्राप्य दश स्तोभैः स्पर्धेयं विजिता।

।। इति वार्ता: ।।